International Journal of Sanskrit Research 2015; 1(7): 66-70

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(7): 66-70
© 2015IJSR
www.sanskritjournal.com
Received: 12-09-2015
Accepted: 15-10-2015

**अनुप कुमार रानो**
गवेषकः, विश्वभारती, शान्तिनिकेतनम्
सहकारी अध्यापकः, चण्डीदास- महाविद्यालयः,
पश्चिमवङ्गः.

**Correspondence**
**अनुप कुमार रानो**
गवेषकः, विश्वभारती, शान्तिनिकेतनम्
सहकारी अध्यापकः, चण्डीदास- महाविद्यालयः,
पश्चिमवङ्गः.

# रसभेदाः- प्राकृतालंकारिकदृशा गौडीयवैष्णवदृशा च

***अनुप कुमार रानो***

रसस्य भेदविषये पण्डितानां मतपार्थक्यं परिलक्ष्यते। आचार्येण भरतमुनिना अष्ट रसाः स्वीकृताः। परवर्तीकाले नवमः शान्तरसः, दशमो वात्सल्यरसः, एकादशः प्रेमरसः, द्वादशो भक्तिरसस्तथा अन्येऽपि बहवो रसाः पृथग्रूपेणोद्भूताः। तत्र प्राकृतालंकारिका भरतादयः प्राकृतचरित्रसम्बद्धान् रसान् स्वीकुर्वन्ति। परन्तु अप्राकृतरसतात्विका गौडीयवैष्णवाचार्याः केवलं अप्राकृतं भक्तिरसं प्रेमरसं वा स्वीकुर्वन्ति। तेषां मतेन् अप्राकृतः श्रीकृष्ण एव नायकः। प्राकृतचरित्रैः काव्ये रसा न उत्पद्यन्ते। भरतमुनेः आरभ्य प्रमुखैः आलंकारिकैः केन प्रकारेण रसभेदः कृतः तथा रसभेदविषये प्राकृतालंकारिकैः सह गौडीयवैष्णवाचार्यानां मतपार्थक्यमेव प्रबन्धस्यास्य विषयः।

**कुञ्जिशब्दाः** प्राकृतरसः, अप्राकृतरसः, गौडीयवैष्णवः, भक्तिरसः, अप्राकृतरसतात्विकाः, प्राकृतचरित्रम् इत्यादयः।

भारतीयकाव्यशास्त्रे भरतमुनेः आरभ्य अद्यापि रसस्य निष्पत्तौ स्वरूपे विकासे च गभीरतया विचारो भवति। तत्र सर्वप्रथमं नाट्यशास्त्रप्रणेता भरतमुनिः रससिद्धान्तं स्थापितवान्। तन्मते रसं विना किमपि नाट्यं कथमपि प्रवर्तयितुं न शक्यते "न हि रसादृते कशिदर्थः प्रवर्तते"। वस्तुतः काव्यस्य मूलतत्त्वं रस एव। रसं विना काव्ये गुणालङ्कारादयो न शोभन्ते। न च रसं विना काव्यमेव सम्भवेत्। भरतमुनेः अनन्तरं काव्यतत्त्वज्ञैः प्रत्यक्षाप्रत्यक्षरूपेण रससिद्धान्तस्य विकासे महत्वपूर्णः प्रयत्नः कृतः। आलङ्कारिकाः भामह-दण्डि-रुय्यकादयः, वक्रोक्तिवादी कुन्तकः, औचित्यवादी क्षेमेन्द्रः, ध्वनिवादिनः अनन्दवर्धन-मम्मट-जगन्नाथादयश्च सर्वे अपि रससिद्धान्तस्य परिस्करणे प्रशंसनीयं यत्नं कृतवन्तः। नाट्यतत्त्वस्य प्रणेतारो धनञ्जय-शारदातनय-सिङ्गभूपाल-रामचन्द्रगुणचन्द्रादयश्च रसशास्त्रं नवीनविचारैः अलङ्कर्तुं प्रयासं कृतवन्तः। रससिद्धान्तवादिनो भोजराज-भानुदत्तयोरपि प्रयासो विषये अस्मिन् प्रशंसनीय एव। भरतमुनेः रससूत्रस्य व्याख्यातारो लोल्लटशङ्कुकभट्टनायकाभिनवगुप्तादयश्च रसवृक्षस्य संवर्धने महान्तं यत्नं कृतवन्तः। तदनु गौडीयगोस्वामिभिः भक्तिरसो नूतनतया स्थापितः। येन कालान्तरे रससंख्यायाः वृद्धिरपि जाता। तस्मात् जीवगोस्वामि-रूपगोस्वामि-मधुसूदनस्वामि-कविकर्णपूरादयः सर्वदैव संस्मरिष्यन्ते।
वस्तुतः व्रह्मास्वादसहोदरः रसः तु एकविधः। परन्तु स्थायिभावभेदात् रसस्यापि भेदाः परिदृश्यन्ते। कविकर्णपूरः अपि अस्य मतस्य समर्थकः। तस्य मतेन रसे चमत्कारस्यैव प्राधान्यम्।

**आनन्दरूपत्त्वात् रसस्य एकविधत्वं परन्तु उपाधिभेदात् रसः तु नानाविधः-**
"रसस्यानन्दधर्मत्वादैकध्यं.....................उपाधिभेदान्नानात्वम्" अलंकारकौस्तुभः, १३० पृष्ठम्।
रत्यादयः स्थायिनः उपाधयः। परन्तु टिप्पण्यां शिवप्रसादभट्टाचार्यमहोदयेण उक्तं यत् – आलम्वनोद्दीपनादयः उपाधयः। तस्य मतानुसारेन् "यथैव एवाकाश उपाधिभेदात् घटकशपटाकाशदिसंज्ञया पृथक् पृथक् उल्लिख्यते, तथैक एव रस आलम्वनोद्दीपनादिनानाविधोपाधिभेदेन कदाचित् शृङ्गारतया, कदाचित् वीरत्वेन, कदाचित् करुणाख्यया वा व्यवह्रियते" अलंकारकौस्तुभः, १३० पृष्ठम्।
रसस्य शृङ्गारादिभेदो हि सर्वथा प्राचीनो वर्त्तते। शृङ्गारादिरसानां नाम्ना निर्देशस्तु लौकिकसाहित्ये प्रथमतः आदिकविना वाल्मीकिना रामायणीयवालकाण्डे कृतः। पशाद् भरतमुनिना स्वविरचिते नाट्यशास्त्रे अष्ट रसाः परिगणिताः। किन्तु केषाञ्चिन्मते नवमः शान्तरसः, दशमः वात्सल्यरसः, एकादशः प्रेमरसः, द्वादशः भक्तिरसस्तथा अन्ये अपि बहवो रसाः

पृथग्रूपेणोद्भूता:। नाट्यशास्त्रकार: भरताचार्य: तस्य नाट्यशास्त्रस्य चतुर्थे अध्याये रसस्य अष्टविधत्वं स्वीकरोति। तत्र तेन प्रत्येकरसस्य वर्णाधिदेवतादीनां विशदं विवरणं कृतम्। उच्यते मुनिना----

"शृङ्गारहास्यकरुणा रौद्रवीरभयानका:।
वीभत्साद्भूतसंज्ञौ चेत्यष्टौ नाट्ये रसा: स्मृता:॥" नाट्यशास्त्रम् ४/१५

तस्य मतेन शृङ्गारात् हास्यरसस्य, रौद्रात् करुणस्य, वीरात् अद्भुतरसस्य, तथा वीभत्सात् भयानकस्य उत्पत्ति: भवति---

"शृङ्गाराद्धि भवद्धास्यो रौद्रात्तु करुणो रस:।
वीराच्चैवाद्भुतोत्पत्तिर्वीभत्साच्च भयानक:॥" नाट्यशास्त्रम् ४/३९

परन्तु आचार्य: षष्ठे अध्याये अष्टरसविलक्षणं शान्तं स्वीकरोति। उक्तञ्च मुनिना-

"न यत्र दु:खं न द्वेषो नापि मत्सर:।
सम: सर्वेषु भूतेषु स: शान्त: प्रथितो रस:॥" नाट्यशास्त्रम् ६/१०६

परवर्तीकाले साहित्यमीमांसकानां मध्ये शान्तरसस्य अस्तित्वविषये मतभेदा: परिलक्ष्यन्ते। केचित् पण्डिता: तु केवलं काव्ये शान्तं स्वीकरोति, न तु नाट्ये। केचन तु उभयत्र। भरतमुने: आरभ्य पण्डितराजपर्यन्तं सुदीर्घं सार्धसहस्रवत्सरं यावत् पण्डिता: शान्तस्य रसरूपताविषये तेषां महतीं भावनां व्यक्तवन्त:। महाकवे: कालिदासस्य समये अष्टरसस्य धारणा प्रचलिता आसीत्। तर्हि दृश्यते विक्रमोर्वशीये------

"मुनिना भरतेन य: प्रयोगो भवतीष्वष्टरसाश्रयो निवद्ध:"। विक्रमोर्वशीयम् २/१७

कालिदास: भरतं अष्टरसस्य प्रवर्तकरूपेण जानाति। आलङ्कारिकाणां मध्ये प्रथमं तावत् उद्भटेण शान्तरसस्य पृथक् अस्तित्वविषये सचेतनताया: परिचय: दत्त:। तेन नव रसा: नाट्ये स्वीकृता:----

"शृङ्गारहास्यकरुणरौद्रवीरभयानका:।
वीभत्साद्भूतशान्ताश्च नव नाट्ये रसा: स्मृता:॥" अलंकारसंग्रह: ४/५

अभिनवभारतीभाष्ये अभिनवगुप्त: उक्तवान् यत् --- सर्वे साहित्यमीमांसका: शान्तरसस्य अस्तित्वं न स्वीकरोति, परन्तु नाट्यशास्त्रस्य प्राचीने पुस्तके शान्तरसविषये आलोचना दृश्यते। तर्हि शमस्थायिभावात्मक: शान्तरस: न अस्वीकार्य:। दशरूपककार: धनञ्जय: नाट्ये शान्तरसं न स्वीकरोति, परन्तु काव्ये नवमरसस्य अस्तित्वं तेन स्वीकृतम्। अवलोककार: धनिक: काव्ये तथा नाट्ये उभयत्र कुण्ठितचित्ते विशेषलक्षणविशिष्टं शान्तं स्वीकृतवान्। रसगङ्गाधरकार: जगन्नाथ: शान्तरसविरुद्धं मतं खण्डित्वा शान्तस्य पृथक् अस्तित्वं स्वीकरोति। तस्य मतेन रस: नवधा। भरतमुने: वचनं तेन प्रमाणरूपेण गृहीतम्-----

"मुनिवचनं चात्र प्रमाणम्'' रसगङ्गाधर: ३४ पृष्ठम्।

काव्यप्रकाशकार: मम्मट: यद्यपि रसालोचनाया: प्रारम्भे नाट्ये अष्टविधरसस्य उल्लेखं करोति परन्तु उपसंहारे तेन निर्वेदस्थायिभावात्मक: शान्तरस: स्वीकृत:---

"निर्वेदस्थायिभावोपि शान्तोऽपि नवमो रस:"।

साहित्यदर्पणकारस्य विश्वनाथस्य मतेनापि रस: नवविध:-------

"शृङ्गारहास्यकरुणरौद्रवीरभयानका:।
वीभत्सोद्भूत इत्यष्टौ रसा: शान्तस्तथा मत:॥" साहित्यदर्पणम् ३/१८२

आचार्य: विश्वनाथ: वात्सल्यरसस्यापि उल्लेखं कृतवान्----

"स्फुटं चमत्कारितया वत्सलं च रसं विदु:'' साहित्यदर्पणम् ३/२५१।

आचार्य: भोजराज: एतदतिरिक्तं प्रेमरसमपि स्वीकृतवान्। आचार्य: शारदातनय: नवरसतत्त्वस्य समर्थक:। परन्तु तेन नाट्ये शान्तरसस्य अस्तित्वं न स्वीकृतम्। 'भावप्रकाशनम्'-ग्रन्थे तेन विवृतं यत् अभिनयमाध्यमेन शान्तरसस्य यथार्थ: अभिव्यक्ति: न भवति। शिङ्गभूपाल: तस्य रसार्णवसुधाकरे अष्टरसं स्वीकृतिं ददाति। रुद्रभट्ट: आत्मानं नवरसतत्त्वस्य प्रवर्तकरूपेण परिचयं ददाति। स् तस्य शृङ्गारतिलके नवरसान् स्वीकृतवान्, प्रधानत: श्रव्यकाव्ये------

"प्रायो नाट्यं प्रति..................काव्यं प्रति निगद्यते'' शृङ्गारतिलकम् १/५

अनेन प्रकारेण दृश्यते यत् शान्तरसस्य अस्तित्वविषये पण्डितानां मध्ये मतभेदा: दृश्यन्ते। शान्तरसविरोधिन: आचार्या: भरतमुनिमपि शान्तरसविरोधीरूपेण प्रमाणयितुं चेष्टन्ति। यत: "अष्टौ नाट्ये रसा: स्मृता:'' इति भरतेन उक्तम्। अपि च तेषां मते शान्तरस: अयं विक्रियाजनकत्वेन, अनभिनेयत्वेन नाटके अप्रयोजनीयत्वेन शान्तरसो भवितुं नार्हति। अपि च रागद्वेषाभावात् सहृदया: अस्य रसस्यास्वादने न समर्था:--

"न च तथाभूतस्य सहृदया: स्वादयितार: सन्ति'' दशरूपकम् ४/४५ टीका।

धनञ्जय: वीरबीभत्सयोर्मध्ये शान्तस्य अन्तर्भावं स्वीकरोति। अपि च शान्तस्य स्थायिभावविषये अपि मतभेदा: दृश्यन्ते। केचित् पण्डिता: सर्वचित्तवृत्तिप्रशमं, केचित् जना: सम्यग्ज्ञानं निर्वेदं वा, केचित्तु तृष्णाक्षयसुखं धृतिं वा स्थायिभावरूपेण स्वीकुर्वन्ति। एतस्मादेव कारणात् साहित्यमीमांसका: शान्तरसस्वीकारे सन्दिग्धा: आसन्।

परन्तु बहव: विद्वांस: शान्तरसं स्वीकुर्वन्त्येव। महर्षे: वेदव्यासस्य कथानुसारं संसारे यानि लौकिकसुखानि सन्ति, यावच्च दिव्यं महत्सुखं विद्यते, तानि च तृष्णाक्षयसुखस्य षोडशीकलासाम्यमपि न भजन्ते------

"यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षय: सुखस्यैते नार्हत: षोडशीकलाम्॥" महाभारतम्, शान्तिपर्वम् १७४/४७

भरतमुनि: तु सर्वेषां रसानां प्रकृतिरूपेण शान्तरसं स्वीकरोति। तस्य मते अन्ये रसास्तु विकृतिरूपा:। यथा समुद्रे वायुवेगात् तरङ्गा: समुद्भवन्ति, पुनश्च वायोरपाये सति तरङ्गा समुद्रे एव विलीयन्ते तथैव शृङ्गारादय: सर्वे रसा: शान्तरसादुत्पद्यन्ते, किन्तु निमित्तापाये पुन: तत्रैव विलीयन्ते-------

"भावा विकारा रत्याद्या: शान्तस्तु प्रकृतिर्मत:।
विकार: प्रकृतेर्जात: पुनस्तत्रैव लीयते॥
स्वं स्वं निमित्तमासाद्य शान्ताद्भाव: प्रवर्तते।
पुनर्निमित्तापाये च शान्त एवोपलीयते॥" नाट्यशास्त्रम् ६/३३५-३६

अभिनवगुप्तेनापि शान्तरसस्य उत्कर्ष: स्वीकृत:--------

"सर्वरसानां शान्तप्राय: एवास्वाद:, विषयेभ्यो विपरिवृत्त्या'' अभिनवभारती ६/१०८

आनन्दवर्धनाचार्यादिमते अपि शान्तरस: अस्त्येव। यदुक्तं लोचनकारेण------

"मुनिनाप्यङ्गीकृततया एव क्वचिच्छम:''।

पण्डितराजगन्नाथेन रसगङ्गाधरे प्रतिपादितं यत् यैर्नाटके शान्तरसो न स्विक्रीयते, तैरपि वाधकाभावात् महाभारतादिप्रवन्धे च सर्वै: शान्तरस: अनुभवसिद्धत्त्वेन श्रव्यकाव्ये तु शान्तरस: अवश्यमेव स्वीकर्त्तव्य:। अत एव मम्मटेनापि "अष्टौ नाट्ये रसा: स्मृता:'' इति प्रतिपाद्य "शान्तोपि नवमो रस:'' इत्यादिना उपसंहत:।
वात्सल्यरसविषये अपि पण्डितानां मध्ये मतभेदा: दृश्यन्ते। केचित्तु वात्सल्यं रसरूपेण न स्वीकुर्वन्ति। आचार्यहेमचन्द्रानुसारेण वात्सल्यं रतेरेव भेद:---

"स्नेहो भक्तिर्वात्सल्यमिति हि रतेरेव विशेषा:'' काव्यानुशासनम् ६८ पृष्ठम्।

अभिनवगुप्तमतानुसारेण वस्तुतो वात्सल्यं भावमात्रमेव, न तु रसरूपम्। काव्यप्रकाशकारादिमते पुत्रादिविषयकरति: वात्सल्यभावमात्रमेव, न तु वात्सल्यरसरूप:। परन्तु आचार्य: भरतमुनि: तस्य नाट्यशास्त्रे वात्सल्यरसस्य विधानं कृतवान्। तेन उक्तम्--------

"तत्र हास्य शृङ्गारयो: स्वरितोदात्तै:, वीररौद्राद्भुतेषु उदात्तकम्पितै:।
करुणवात्सल्यभयानकेषु अनुदात्तस्वरितकम्पितैर्वर्णै: पाठ्यमुपपादयति॥ नाट्यशास्त्रम्"

कविकर्णपूरेणापि वात्सल्यरस: स्वीकृत:। तस्य मते तु अस्य स्थायिभाव: ममाकार: अस्ति। आचार्य: विश्वनाथ: वात्सल्यरसं स्वीकरोति। वात्सल्यरसस्य पुत्रादिरालम्वनविभाव:, वालसुलभचेष्टादय: अस्य उद्दीपनविभावा: ; आलिङ्गनम्, अङ्गस्पर्श:, शिरश्चुम्वनम्, रोमाञ्च:, आनन्दाश्रु: इत्यादय: अनुभावा:; स्तनस्रावादय: सात्विकभावा: ; अनिष्टशङ्का-हर्ष-गर्वादयश्च सञ्चारिभावा भवन्ति विदुषां रसाज्ञानां मते।
संस्कृतसाहित्ये काव्यशात्रबिद्धि: भक्तिरस: शुद्धस्वतन्त्ररूपेण न स्वीक्रियते। भरतमुने: नाट्यशास्त्रे अस्य रसस्य उल्लेखो नास्ति। तेन तु भक्ते: रसत्वं भावत्वं वा किमपि न स्वीकृतम्। अनुमीयते ऋषि मुख्यतया अभिनेयस्य विचारक:, तस्मिन् काले भक्तियुक्ताभिनेयस्य साहित्यस्य दौर्लभ्यं भवेत्। परवर्तीकाले तु संस्कृतकाव्यतत्त्वज्ञै: शृङ्गारादिनवरसातिरिक्तानां प्रेयो-भक्ति-वत्सल्यादिरसानामपि गणना कृता। परन्तु प्रमुखा: आचार्या: भक्तिरसं शुद्धस्वतन्त्ररूपेण न स्वीकुर्वन्ति। आचार्यदण्डिणा परमात्मविषयिका या परमप्रीति: सैव भक्तिरिति समुद्भविता----
"भक्ति: भगवद्विषये परमप्रीति:''। किन्तु तेनापि भक्ति: रसरूपेण न प्रोक्ता, भावरूपेणैव स्वीकृता:। काव्यादर्शे तेन प्रीति: प्रेयोलङ्कारे निक्षिप्ता। कालान्तरे रुद्रटेन प्रेयोतिरिक्तरसत्वेन सम्मानित:, तस्य च स्थायिभाव: स्नेह: स्थापित:। इत्थं च दृश्यते रुद्रटेनापि स्पष्टतया स्वतन्त्ररूपेण भक्ते: रसत्वं नाङ्गीकृतम्। किन्तु नामान्तरेण स्वीकृतमेव-----

"शृङ्गारवीरकरुणवीभत्सभयानकाद्भुता हास्य:।
रौद्र: शान्त: प्रेयानिति मन्तव्या रसा: सर्वे॥'' काव्यालंकार: १२/३

दण्डिन: पश्चादुद्भटेनापि प्रेय: अलङ्कारतयैव स्वीकृत:----------

"रत्यादिकानां भावानामनुभावादिसूचनै:।
यत्काव्यं वोध्यते सद्भिस्तत्प्रेयस्तदुदाहृतम्॥'' अलंकारसंग्रह: ४/२

मम्मटमते देवादिविषयिणी रति: व्यभिचारीभावमात्रमेव-------

"रतिर्देवादिविषया व्यभिचारी तथाञ्जित:''। काव्यप्रकाश: ४/३५

एवमेव विश्वनाथमते देवादिविषयिणी रति: भावमात्रमेव---------

"देवादिविषया रति:..........................भाव इत्यभिधीयते''। साहित्यदर्पणम् ३/२६०

हेमचन्द्राचार्यमते भक्ति: भाव एव, न तु रस:। यत: हि तन्मते हीनस्य उत्तमे या रति: सा भक्ति:। भावरूपेणैव रति: आस्वादनीया भवति, न तु रसरूपेण---------

"अनुत्तमस्योत्तमे या रति: प्रसक्ति: सैव भक्तिपदवाच्य:।...........एवमादौ च विषये भावस्यैवास्वाद्यत्वमिति''।

आचार्य: भोजराज: द्वादशरसान् स्वीकृतवान्, परन्तु स: भक्तिविषये किमपि न उक्तवान्। भानुदत्तेन यद्यपि वात्सल्य-लौल्य-कार्पण्यै: सहभक्ति: समुद्भाविता: किन्तु पुनस्तेषां भावत्वमेव स्वीकृतम्----------

"ननु वात्सल्यं लौल्यं भक्ति: कार्पण्यं वा कथं न रस:। आर्द्रताभिलाषश्रद्धास्पृहानां स्थायिभावानां स्त्वादिति चन्न। तेषां व्यभिचारिरत्यात्मकत्वात्'' रसतरङ्गिणी तरङ्गम् ५

एवञ्च दृश्यते साहित्यमीमांसका: विद्वांस: भक्तिरसं स्पष्टतया स्वतन्त्ररूपेण न स्वीकुर्वन्ति।केचित् जना: तु नामान्तरेणैव स्वीकुर्वन्ति।
परन्तु वैष्णवाचार्या: भक्तिरसं स्वीकुर्वन्ति। श्रीरूपगोस्वामिमते भक्तिरस: एव प्रकृतिरस:, तद्भिन्ना: अन्ये रसास्तु विकृतिरूपा: एव। विभावानुभावव्यभिचारिभि:सह जाता सत्विकभावसम्पन्ना रति: यदा भक्तसहृदयानां चेतसि रसतया आस्वाद्यते तदा स एव भक्तिरस: इत्यभिधीयते। भक्तिरसस्य स्थायिभाव: भगवद्रति:। उक्तं--------------

"स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभि:।
एषा कृष्णरति: स्थायी भावो भक्तिरसो भवेत्॥'' भक्तिरसामृतसिन्धु: २/१/६

मुक्ताफलानुसारेण ईश्वरविषयारतिरेव भक्तिरसे विपरिणमते----- “व्यासादिभिर्वर्णितस्य विष्णो: विष्णुभक्तानां वा चरित्रस्य नवरसात्मकस्य श्रवणादिना जनितश्चमतकारो भक्तिरस:’’। श्रीमधुसूदनस्वामिमते भक्तिरस: स्वतन्त्रो रस: अस्ति। भक्तिरसायने तेन प्रतिपादितं यत् अन्यरसदृशा भक्तिरपि स्वविभावादिभिर्युक्ता सती चित्ररूपवद् रसत्वं प्राप्नोति--------

> “रसान्तरविभावदिसंकीर्णा भगवद्रति:।
> चित्ररूपवदन्यादृग्रसतां प्रतिपद्यते।।’’ भक्तिरसायनम् २/७२

तन्मते कान्तादिविषयकशृङ्गारादिलौकिकरसेषु पूर्णं सुखं नास्ति। परन्तु अलौकिक: भक्तिरस: पूर्णसुखमयो भवति। अत: आनन्दपूर्णभक्तिरस: सततं सर्वै: स्वीकार्य:।

परमवैष्णवाचार्यानां महनीया कीर्ति: भक्ते: स्वतन्त्ररूपेण रसत्वस्थापने। तै: भक्तिरस: सर्वेषु रसेषु श्रेष्ठतमत्वेन निरूपित:। एवञ्च परिदृश्यते भक्तिरसस्य स्थापने न केवलं वैष्णवाचार्यानां, अपितु श्रीमधुसूदनस्वामि-श्रीकरपात्रस्वामि-प्रभृतीनां अद्वैताचार्यानां महनीया कीर्ति: दृश्यते। भक्तिरसस्य परिपोषणे च जीवगोस्वामिकृत-भक्तिरसामृतसिन्धोस्टीकायां दुर्गमसङ्गमन्याम्, मुकुन्दस्वामिकृतार्थरत्नाल्पदीपिकायाम्, विश्वनाथचक्रवर्तिकृतभक्तिसारप्रदर्शिन्याम्, श्रीकरपात्रस्वामिकृतभक्तिरसार्णवे च बहुयुक्तय: प्रतिपादिता:।

अलङ्कारशास्त्रे शृङ्गारादिनवरसातिरिक्ता अन्ये अपि बहव: रसा: विभिन्नाचार्यानां मते स्थापिता: परिदृश्यन्ते। तत्र रुद्रट्मते स्नेहस्थायी प्रेयोरस:, विश्वनाथमते वत्सलस्थायी वात्सल्यरस:, रामचन्द्रगुणचन्द्रमते गार्ध्यस्थायी लौल्यरस:, आसक्तिस्थायी व्यसनरस:, अरतिस्थायी दुख:रस:, सन्तोषस्थायी सुखरस:, भानुदत्तम्ते मिथ्याज्ञानस्थायी मायारस:, भोजराजमते मतिस्थायिभाव: उदात्तरस:, गर्वस्थायी उद्धतरस:, हर्षस्थायी आनन्दरसश्च विद्यते। अपि च तन्मते एकोनपञ्चाशदपि भावा विभावादिभि: परमप्रकर्षं प्राप्य रसत्वं प्राप्नुवन्ति। अपि च केषाञ्चिन्मते देशभक्तिरस:, मृगयारस:, अक्षरस:, क्रान्तिरस:,प्रक्षोभरस:, प्रशान्तरस: विलोक्यन्ते ग्रन्थेषु।

यदि पूर्वोक्तरसा: स्वीक्रियन्ते तर्हि सर्वेषां भक्तानां अनुभवसिद्धस्य भक्तिरसस्य स्वीकारे न कापि क्षति:। वस्तुत: परमकल्याणभाजनं केवलं भक्तिरस एव, भक्त्या एव सकारणदुखहानं मोक्षश्च प्राप्यते।

अनेन प्रकारेण दृश्यते यत् वैष्णवाचार्या: भक्तिरसस्य उत्कर्षं प्रतिपादयति परन्तु लौकिकरसशास्त्रकारा: भक्ते: रसत्वं न स्वीकुर्वन्ति। उभयोर्मध्ये सामञ्जस्यं स्थापयति आचार्य: कविकर्णपूर:। स तस्य अलङ्कारकौस्तुभे रसस्य त्रिविधत्वं स्वीकरोति---प्राकृत:, अप्राकृत:, आभासश्च। मलतीमाधवादि-लौकिकचरित्रनिष्ठ: रस: प्राकृतरस:। अप्राकृत: अलौकिक: दिव्यचरित्रनिष्ठ:। श्रीकृष्णराधादय: दिव्यचरित्रा:। अनौचित्यादिप्रवर्तित: रस: आभास:। अभास: पुन: त्रिविध:-- प्रसिद्धकृत्रिमसिद्धभेदात्।

अलङ्कारकौस्तुभकार: कविकर्णपूर: लौकिकालौकिकानां रसानां सामञ्जस्यविधानाय महतीं प्रचेष्टां कृतवान्। तस्य ग्रन्थे तेन लौकिकरसानां विवेचनं कृतं, पुनश्च वैष्णवसम्प्रदायं प्रति आनुगत्यमपि तेन प्रदर्शितम्। कविकर्णपूर: प्राकृतरसानं अस्तित्वं स्वीकरोति, परन्तु एतन्न वैष्णवसम्प्रदायसम्मतम्। तस्य सम्प्रदायस्य मते परमपुरुष: भगवान् श्रीकृष्ण: एव रसस्य विषय:, न तु लौकिकचरित्रा: । परन्तु कविकर्णपूर: प्रचलित-साहित्यशास्त्रसिद्धान्तं प्रति श्रद्धाशीलं भूत्वा प्राकृतचरित्रनिष्ठान् रसान् स्वीकरोति। परन्तु अलङ्कारकौस्तुभे तेन कुत्रापि प्राकृताश्रयी रसस्य उदाहरणं न प्रदत्तम्। केवलं श्रीकृष्णाश्रयी उदाहरणमेव तेन प्रदत्तम्। अनेन अनुमीयते यत् स: प्राकृतरसं गौणरसरूपेण स्वीकरोति, अप्राकृतरस: एव मुख्यरस:। यद्यपि कविकर्णपूर: प्राकृताप्राकृताभासभेदात् रसस्य त्रिविधत्वं स्वीकरोति, परन्तु अलङ्कारकौस्तुभस्य टीकाकारस्य लोकनाथचक्रवर्तिमहोदयस्य मते प्राकृताश्रिता: रत्यादय: स्थायिभावा: रसत्वं न लभन्ते। उक्तं च टीकाकारेण---

> “प्राकृते रस एव नास्ति, तदपि यत् त्रैविध्यमुक्तं तत् परमतानुसारेणेति ज्ञेयम्। प्राकृते ये रसं मन्यन्ते ते भ्रान्ता एव ; यत: अत्र कृमिविड्भस्मान्तनिष्ठेषु प्राकृतनायकेषु अतिनश्वरेषु रसो न भवति, विचारतो विभाववैरूप्यात्तद्विपरीतं घृणामयं वैरस्यमेवोत्पद्यते, तत्रैव रसं वर्णयन्तीत्यर्थ:। अत एव ग्रन्थकारेणापि प्राकृतविषय एकमपि पद्यं नोदाहृतं किन्तु अप्राकृत एव सर्वाणि पद्यानि उदाहृतानीति ज्ञेयम्’’। अलंकारकौस्तुभ: १३१ पृष्ठम्

आचार्य: कविकर्णपूर: द्वादशरसान् स्वीकृतवान्। भरतमुनिसम्मता: अष्ट नाट्यरसा:, काव्यप्रकाशकारसम्मत: शान्तरस:, भोजराजस्वीकृता: वात्सल्यरस: प्रेमरसश्च, तथा च वैष्णवसम्मत: भक्तिरस: तेन स्वीकृता:। तस्य मते प्रेमैव मूलरस:। तत्रैव सर्वे रसा: समावेश्यन्ते------

> “प्रेमरसे सर्वे रसा अन्तर्भवन्तीत्यत्र महीयानेव प्रपञ्च’’ अलंकारकौस्तुभ: १३५ पृष्ठम्।

तन्मते सर्वे शृङ्गारादय: रसा: भावाश्च जलतरङ्गा इव उन्मज्जन्ति निमज्जन्ति च--

> “उन्मज्जन्ति निमज्जन्ति प्रेम्ण्यखण्डरसत्वत:।
> सर्वे रसाश्च भावाश्च तरङ्गा इव वारिधौ।।’’ अलंकारकौस्तुभ: १३५ पृष्ठम्

अनेन प्रकारेण दृश्यते यत् आचार्य: कविकर्णपूर: लौकिकरसालोचकानां मम्मटादीनां तथा अलौकिकभक्तिरसवर्णयितानां रूपगोस्वामिप्रभृतीनां मध्ये समन्वयसाधनाय यथासाध्यं प्रयत्नं कृतवान्। तेन यद्यपि लौकिकरसा: स्वीकृता: तथापि वैष्णवमतवादं प्रति श्रद्धाप्रदर्शनाय आदौ वीर-करुणाद्भुत-हास-भयानक-वीभत्स-रौद्ररूपानां सप्तविधगौणरतीनां विवेचनं कृतं, तदनु शान्त-वात्सल्य-प्रेम-भक्ति-प्रीतिरूपानां पञ्चविधमुख्यरतीनां वर्णनं कृतम्।

**सन्दर्भग्रन्था:**


1. दास देवकुमार। दशरूपकम्- धनञ्जय:। संस्कृत पुस्तक भाण्डार, कलिकाता,२०१३।
2. नागर: रविशङ्कर। अलङ्कारकौस्तुभ:- कविकर्णपूर:। परिमल पब्लिकेशन्स, दिल्ली ,२०१०।
3. पाण्डेय जनार्दनशास्त्री। भक्तिरसायनम्- मधुसूदनसरस्वती। चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००८।
4. ब्रह्मचारी कपिलदेव। भक्तिरसविमर्श:। भारतीय विद्या प्रकाशन, वाराणसी,१९८९।
5. भादुरी सन्ध्या। रसगङ्गाधर:- जगन्नाथ:। संस्कृत पुस्तक भाण्डार, कलकाता, १९९१।
6. महाभारतम् । गोरक्षपुर; गीताप्रेस।
7. मुसलगावकर गजाननशास्त्री। काव्यप्रकाश:- मम्मट:। कृष्णदास अकादेमी, वाराणसी,२०१३।

8. रूपगोस्वामी। भक्तिरसामृतसिन्धुः। वाराणसी; अच्युत ग्रन्थमाला कार्यालय, १९८८।
9. वन्द्योपाध्याय सुरेशचन्द्र। भरतनाट्यशास्त्र । नवपत्रप्रकाशन, कलकाता, १९८२।
10. विद्यारत्न: रामनारायण:। उज्ज्वलनीलमणि:- रूपगोस्वामी। अरुणोदय यन्त्र, मुर्शिदावाद ,१८७३।
11. विद्यावाचस्पति: श्रीशालग्रामशास्त्री। साहित्यदर्पण:- विश्वनाथ:। भारतीय कला प्रकाशन, दिल्ली, २००८।